# শ্রীরাধাস্তোত্রং ব্রহ্মদেবকৃতম্

{॥ শ্রীরাধাস্তোত্রং ব্রহ্মণকৃতম্ ॥}

ব্রহ্মোবাচ ।

হে মাতস্ত্বৎপদাম্ভোজং দৃষ্টং কৃষ্ণপ্রসাদতঃ ॥ ১॥

সুদুর্লভং চ সর্বেষাং ভারতে চ বিশেষতঃ ।

ষষ্টিবর্ষসহস্রাণি তপস্তপ্তং পুরা মযা ॥ ২॥

ভাস্করে পুষ্করে তির্থে কৃষ্ণস্য পরমাত্মনঃ ।

আজগাম বরং দাতুং বরদাতা হরিঃ স্বযম্ ॥ ৩॥

বরংবৃণীষ্বেত্যুক্তে চ স্বাভিষ্টং চ বৃতং মুদা ।

রাধিকাচরণাম্ভোজং সর্বেষামপি দুর্লভম্ ॥ ৪॥

হে গুণাতিত মে স্ন্হীঘ্রমধুনৈব প্রদর্শয ।

মযেত্যুক্তো হরিরযমুবাচ মাং তপস্বিনম্ ॥ ৫॥

দর্শাযিষ্যাম্মি কালে চ বৎসেদানীং ক্সমেতি চ ।

ন হীশ্বরাজ্ঞা বিফলা তেন দৃষ্টং পদাম্বুজম্ ॥ ৬॥

সর্বেষাং বাঞ্চিতং মাতর্গোলোকে ভারতেঽধুনা ।

সর্বা দেব্যঃ প্রকৃত্যংশা জন্যাঃ প্রাকৃতিকা ধ্রুবম্ ॥ ৭॥

ত্বং কৃষ্ণাঙ্গার্ধসম্ভূতা তুল্যা কৃষ্ণেন সর্বতঃ ।
শ্রীকৃষ্ণস্ত্বমযং রাধা বা হরীঃ স্বযম্ ॥ ৮॥

ন হি বেদেষু মে দৃষ্ট ইতি কেন নিরূপিতম্ ।
ব্রহ্মাণ্ডাদ্ বহিরূর্ধ্বং চ গোলোকোঽস্তি যথাম্বিকে ॥ ৯॥

বৈকুণ্ঠশ্চাপ্যজন্যশ্চ ত্বমজন্যা তথাম্বিকে ।
যথা সমস্তব্রহ্মাণ্ডে শ্রীকৃষ্ণাংশাংশ জীবিনঃ ॥ ১০॥

তথা শক্তিস্বরূপা ত্বং তেষু সর্বেষু সংস্থিতা ।
পুরুষাশ্চ হরেরংশাস্ত্বদংশা নিখিলাঃ স্ত্রিযঃ ॥ ১১॥

আত্মনো দেহরূপা ত্বমস্যাধারস্ত্বমেব হি ।
অস্যা নু প্রাণৈস্ত্বং মাতস্ত্বৎপ্রাণৈরযমীশ্বরঃ ॥ ১২॥

কিমহো নির্মিতঃ কেন হেতুনা শিল্পকারিণা ।
নিত্যোঽযং চ যথা কৃষ্ণস্ত্বং চ নিত্যা তথাম্বিকে ॥ ১৩॥

অস্যাংশা ত্বং ত্বদংশো বাপ্যযং কেন নিরূপিতঃ ।
অহং বিধাতা জগতাং বেদানাং জনকঃ স্বযম্ ॥ ১৪॥

তং পঠিত্বা গুরুমুখাদ্ ভবন্ত্যেব বুধা জনাঃ ।
গুণানাং বা স্তবানাং তে শতাংশং বক্তুমক্ষমঃ ॥ ১৫॥

বেদো বা পণ্দিতো বান্যঃ কো বা ত্বাং স্তোতুমীশ্বরঃ ।
স্তবানাং জনকং জ্ঞানং বুদ্ধির্জ্ঞানাম্বিকা সদা ॥ ১৬॥

ত্বং বুদ্ধের্জননী মাতঃ কো বা ত্বাং স্তোতুমীশ্বরঃ ।
যদ্বস্তু দৃষ্টং সর্বেষাং তদ্বিবক্তুং বুধঃ ক্ষমঃ ॥ ১৭॥

যদদৃষ্টাশ্রুতং বস্তু তন্নির্বক্তুং চ কঃ ক্ষমঃ ।
অহং মহেশোঽনন্তশ্চ স্তোতুং ত্বাং কোঽপি ন ক্ষমঃ ॥ ১৮॥

সরস্বতী চ বেদাশ্চ ক্ষমঃ কঃ স্তোতুমীশ্বরি ।
যথাগমং যথোক্তং চ ন মাং নিন্দিতুমর্হসি ॥ ১৯॥

ঈশ্বরাণামীশ্বরস্য যোগ্যাযোগ্যে সমা কৃপা জনস্য ।
প্রতিপাল্যস্য ক্ষণে দোষঃ ক্ষণে গুণঃ ॥২০॥

জননী জনকো যো বা সর্বং ক্ষমতি স্নেহতঃ ।
ইত্যুক্ত্বা জগতাং ধাতা তথৌ চ পুরতস্তযোঃ ॥ ২১॥

প্রণম্য চরণাম্ভোজং সর্বেস্ঃআং বন্দ্যমীপ্সিতম্ ।

ব্রহ্মণা চ কৃতং স্তোত্রং ত্রিসংধ্যং যঃ পঠেন্নরঃ ।

রাধামাধবযোঃ পাদে ভক্তিং দাস্যং লভেদ্ ধ্রুবম্ ॥ ২২॥

কর্মনির্মূলনং কৃত্বা মৃত্যুং জিত্বা সুদুর্জযম্ ।

বিলঙ্ঘ্য সর্বলোকাশ্চ যাতি গোলোকমুত্তমম্ ॥ ২৩॥

॥ ইতি শ্রীব্রহ্মবৈবর্তে ব্রহ্মণ কৃতং শ্রীরাধাস্তোত্রং সম্পুর্ণং॥

Encoded by Daniel Mohanpersad danielmohanpersad98@msn.com

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Radha Stotram ( By Brahma ) Lyrics in Bengali PDF
% File name : raadhaabrahma.itx
% Location : doc_deities_misc
% Author : brahma
% Language : Sanskrit
% Subject : stotra
% Transliterated by : Daniel Mohanpersad danielmohanpersad98 at msn.com
% Proofread by : Daniel Mohanpersad danielmohanpersad98 at msn.com
% Source : brahmavaivarta puraaNa
% Latest update : August 15, 2002
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ December 11, 2015 ] at Stotram Website